2026

संस्कृतवेदाध्ययनविभाग:

MASVSC201

चितानि वैदिकसूक्तानि-२

Full Marks: 80

Time: 3 Hours

(The figures in the margin indicate full marks for the questions)

लघूत्तराणि प्रदेयानि - **1×10=10**

1. ऋग्वेदस्य अन्तिमं सूक्तं किम् ?
2. 'आकूतिः' इति शब्देन किं बुध्यते ?
3. 'समितिः' इति शब्दस्य कोऽर्थः?
4. पर्जन्यः उदकं कुत्र स्थापयति ?
5. 'कुल्याः' इत्यनेन किं ज्ञायते ?
6. 'विश्वा'इति शब्दस्य लौकिकरूपं किम् ?
7. 'प्रौक्षन्' इति पदस्य अभिप्रायः कोऽस्ति?
8. भूमिः केन देवेन स्थिरीकृता ?
9. 'रेजमाने' इति पदस्य अर्थः कोऽस्ति ?
10. त्रिष्टुप्-छन्दसि कति अक्षराणि सन्ति ?

अधस्तनेषु ***केषाञ्चित् पञ्चानां*** व्याख्या विधेया - **6×5=30**

11. समानी व आकूतिः समाना हृदयानि वः ।
    समानमस्तु वो मनो यथावः सुसहासति ॥
12. वि वृक्षान् हन्त्युत हन्ति रुक्षसो विश्वं बिभाय भुवनं महावधात् ।
    उतानागा ईषते वृष्ण्यावतो यत्पर्जन्यः स्तनयन्हन्ति दुष्कृतः ॥
13. यत्पर्जन्य कनिक्रदत्स्तनयन् हंसि दुष्कृतः ।
    प्रतीदं विश्वं मोदत यत्किं चं पृथिव्यामधि ॥
14. पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् ।
    उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥

15. यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
    वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥
16. हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
    स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥
17. यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
    य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥

अधोलिखितेषु प्रश्नेषु ***केषाञ्चित्चतुर्णामुत्तराणि*** प्रदेयानि - **10×4=40**

18. विश्वभातृत्वबोधने संज्ञानसूक्तस्य (ऋ. वे. १०.१९१)तात्पर्यमुल्लिख्यताम् ।
19. पर्जन्यसूक्तमधिकृत्य एको निबन्धो लेखनीयः ।
20. पुरुषसूक्तस्य सारांशो लिख्यताम् ।
21. ऋग्वेदस्य हिरण्यगर्भसूक्तानुसारं हिरण्यगर्भस्य माहात्म्यं सरलसुरगिरा लिख्यताम्।
22. पर्यावरणदृष्ट्या पर्जन्यसूक्तस्य तात्पर्यमुल्लिख्यताम् ।
23. पुरुषसूक्तस्य दार्शनिकतत्त्वमुल्लिख्यताम् ।

****